## २४. शाटिका आवश्यकी

वर्णाः

सुबोधा - ममते ! किं करोति भवती ? आगच्छति किम् ?

ममता - कुत्र गच्छसि ?

सुबोधा - एका शाटिका आवश्यकी। भवती अपि आगच्छतु। आपणं गच्छावः।

ममता - किञ्चित् तिष्ठतु। आगच्छामि।

सुबोधा - मम मातुलस्य विवाहः अस्ति। अतः नूतनां शाटिकां क्रीणामि।

ममता - भवती कं वर्णम् इच्छति। भवत्याः नीलः वर्णः युज्यते।

सुबोधा - नैव। नीलवर्णस्य हरितवर्णस्य च शाटिका मम समीपे अस्ति। पाटलवर्णस्य पीतवर्णस्य वा इच्छामि। पश्यामः। तत्र।

ममता - कति रूप्यकाणां शाटिकां स्वीकरोति भवती ?

सुबोधा - सामान्यतः ३०० रूप्यकाणाम्। ततोऽपि अधिकमूल्यस्य मास्तु। मम माता मम निमित्तम् एकाम् आनयति। सा श्वेतकृष्णवर्णयोः मिश्रिताम् एकां शाटिकां स्वीकृतवती।

ममता - भवत्याः रक्तवर्णस्य शाटिका बहु उत्तमा अस्ति भोः।

सुबोधा - किन्तु अहं तां न इच्छामि। अहं हरितवर्णस्य शाटिकां बहु इच्छामि।

ममता - अस्तु आपणे याम् इच्छति तां स्वीकरोतु।